109
7

अथ
वेदान्तसारव्याख्या

नरसिंहसरस्वतीप्रणीत

१०९
७

[illegible]

970

Vedanta Sara Vyakhya.

श्रीमत्सच्चिदानंदाय नमः कृष्णानंदगुरुं नत्वा परमानंदमद्वयं वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबोधिनीं १ इह खलु
कश्चिन्महापुरुषो नित्याध्ययनविध्यधीतसकलवेदराशीनां चित्तमात्राश्रयतत्पाठपाठैरर्थविषयानाधानतिविषयीभावरूपा
ध्यानविलक्षितानंतमेवानुष्ठितकर्मकाम्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेष्वंतःकर
णेष्वस्मिंघर्षितादर्शतलवदतिनिर्मलाशयानां नलिनीदलगतजलबिंदुवच्चंचलां भोगाभोगविरक्तवपुर्जीवितजीवकल्पत्वं
मवगम्यासारसंसारजालगतेर्भोगाभोगेरतापत्रयाग्निसंदह्यमानमनिशमात्मानमनुपश्यतां मतिविवेकिनां अत एव ऐहि
कलौकिकचंदनवनिताविषयभोगेभ्यः आमुष्मिकहिरण्यगर्भाद्यमृतभोगेभ्यश्च वातात्पूर्वनरवत्प्रतिनिर्विद्यमानमनसां शमादि
साधनसंपन्नानां आपाततोऽधिगताखिलवेदार्थत्वाद्देहाद्यहंकारपर्यंतजडप्रपंचव्यतिरिक्तविलक्षणास्वप्रकाशस्वरूपप्रत्यगा
त्मनि यस्मादेतद्विमृश्यमानानां तज्जिज्ञासूनां मुमुक्षूणां शिष्याणां चोपरि प्राप्तेषु देवतानमस्कारादिलक्षणमंगलाचा
रणासमवनमकर्तव्यतां प्रदर्शयन्नलक्षणायानुबंधचतुष्टयवन्निरूपणपरमात्मानं नमस्कुरुते अखंडमित्यादिना

अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये १ अभीष्टस्य निःश्रेयसस्य सिद्धये प्राप्तये आत्मा
नमाश्रये एकत्वेन प्रतीतिपथयामीत्यर्थः ननु अविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंकायामाह अखिलाधारमिति अखिल
स्य चराचरात्मकप्रपंचस्य विवर्त्ताधिष्ठानत्वेन कारणात्वाकारेणैव वृत्तिप्रतिपद्येत न तु स्वरूपेणेत्यर्थः ननु एवमपि प्रतिपत्तिविषयत्वे आत्मनस्त
द्दृश्यत्वापत्तिमाशंक्याह अवाङ्मनसगोचरमिति यतो वाचो निवर्त्तंते इत्यादिश्रुतिभिरविषयत्वप्रतिपादनात् आत्मनः प्रतिपत्तिविष
यत्वकारणोपलक्षितब्रह्मविषयत्वेनौपचारिकमिति भावः ननु एवमपि ब्रह्मणः कारणात्वेन मृदादिवदनित्यत्वशंकामपहरन्नाह
सदिति नाशाभावोपलक्षितस्वरूपं सदेव सोम्येत्यादिश्रुतेः ननु तथापि जडत्वापत्तिमाशंक्याह चिदिति स्वप्रकाशचैतन्यस्वरूप
मितिपावत ननु तथापि अपुरुषार्थत्वात्किमिति साध्यपरीयमित्यत आह आनंदमिति परमानंदस्वरूपमित्यर्थः ननु तथापि भेदस्थि
तेऽपि लहस्युनेनशांतोऽश्याधिवितिमायेवन प्रपंचस्याधिष्ठानत्वातिस्कृतपापतीपम्यानत्वात्कथमद्वैतसिद्धिरित्याशंकां निरा
कुर्वन्नाह अखंडमिति सजातीयविजातीयस्वगतभेदशून्यमित्यर्थः अत्र सच्चिदानंदप्रयोजनं अखंडमिति विषयः स्पष्टमेव

येयाः प्रतिपाद्यप्रतिपादकभावसंबंधः तत्कामोधिकारीत्यनुबंधचतुष्टयमप्युक्तं किंच यस्य देवे परा भक्तिः यथा देवे तथा गुरौ
तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः इत्यादिश्रुत्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्रतिपादनात्तन्नमस्कारोप्यावश्यकत्वे
न कार्य इति तन्नतिपूर्वकमभिधेयग्रंथं प्रतिजानीते अर्थतोप्यद्वयानंदानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथा
मति २ अपिनाखंडाद्वयत्वसत्तामात्रं व्यवच्छिद्यते अर्थतः शब्दतश्चाद्वयानंदान् गुरूनाराध्य वेदांतसारं यथामति वक्ष्ये इत्यन्वयः
अद्वयश्चासौ आनंदश्च अद्वयानंदस्तान् अद्वयानंदान् अत्र हेतुमाह अतीतद्वैतभानतः अतीतं गतं द्वैतभानं येषां ते तस्मादतीत
द्वैतभानतः निरस्तसमस्तभेदज्ञानत्वादित्यर्थः तान् गुरूनाराध्य कायवाङ्मनोभिर्नमस्कारेणोपचरीकृत्य वेदांतसारं वेदांतानामुप
निषदां कृत्स्नानां मध्ये यत्सारं सिद्धांतरहस्यं यत्प्रमितं ज्ञातं तत्पुनर्नीतं संभावयिष्यंते तं वेदांतसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये
प्रतिपादयिष्ये इत्यर्थः इदानीं सर्वस्यापि वस्तुविचारस्योद्देशपूर्वकत्वात्प्रतिज्ञातं वेदांतं नामतो निर्दिशति वेदांतो नाम उपनिष
त्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च उपनिषदः प्रमाणं उपनिषत्प्रमाणं उपनिषदेव प्रमाणमिति वा तदुपका

रीरादिवेदांतवाक्येषु ग्राहकाणि शारीरकसूत्रादीनि च अथातो ब्रह्मजिज्ञासेत्यादिसूत्राणि आदिशब्देन भगवद्गीतादि अध्यात्म
शास्त्राणि गृह्यंते तेषामप्युपनिषद्भूतत्वादिति भावः ननु प्रकरणेपि अवांतरानुबंधचतुष्टयमापद्यत इति चेद् तथापि प्रस्तानुबंधच
तुष्टयस्य निरूपितत्वात् अपि शास्त्रतां मत्वाति नैरस्यादित्यत आह अस्य वेदांतप्रकरणत्वात् तदीयैरेवानुबंधैस्तद्वत्तासिद्धेर्न ते पृथगा
लोचनीया वेदांतसारस्येत्यर्थः ननु वेदांतशास्त्रस्यापि कमनुबंधचतुष्टयं येनास्यापि तद्वत्तासिद्धिरित्याशंक्य प्रकरणमनुबंधस्वरू
पं तच्चतुष्टयमाविःकरोति तत्रानुबंधो नाम अनुबंधचतुष्टयमेवाह अधिकारिविषयसंबंधप्रयोजनानि यथोद्देशमधिकारि
णं लक्षयति अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोधिगताखिलवेदार्थोस्मिन् जन्मनि जन्मांतरे वा काम्यनिषि
द्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः साधनच
तुष्टयसंपन्नः प्रमाता अधिकारी स्वाध्यायोध्येतव्य इति वचनात् त्रैवर्णिकानामुपनीतानामध्ययनं नियमेन विधीयते अध्यय
नविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तं तथा च अधीतौ वेदः वेदवेदांगानि च शिक्षाकल्पोव्याकरणछंदोज्योति

वे०टी० ३

निरुक्ताद्यानि यत्नेनाध्यापनतोऽधिगताखिलवेदार्थः अत्र तत्तद्वेदार्थे हेमस्य ज्ञातमस्ति उत्तरं येयथैव यथ्यपरित्यागपूर्वा
पाततऽइत्युक्तंमनु अनधीतवेदादीनामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनादध्ययनतत्पयुक्तं कर्मानुष्ठानं नैव पश्येमाथा सो
नरमा र१ जन्मान्तरेति । तेषामाधुनिकाध्ययनाद्यभावेपि जन्मान्तरीयाध्ययनादिनाविनापि विपाकवत्ता अस्मिन्जन्मनि वि
नाप्यध्ययनादिनाज्ञानोपपत्तौ बधकाभावात् नाध्ययनादिविधिवैयर्थ्यमिति भावः काम्येति काम्यस्यापिकर्मणो धर्मसा
धनत्वेपि पापतापातसंपादकत्वेनबंधकत्वात्तन्निषिद्धवत् तद्वर्जनपुरःसरमित्युक्तं तथा च नित्यादिकर्मानुष्ठानेन निर्गतनि
खिलकल्मषतयानिरस्तसमस्तकल्मषत्वेन अत्र निखिलपदं काम्यनिषिद्धजनितसुकृतदुष्कृतपरं तेन नितान्तनि
र्मलस्वान्तः नितान्तमत्यन्तं निर्मलं स्वच्छं स्वान्तमन्तःकरणं यस्य स तथोक्तः साधनचतुष्टयसंपन्नः प्रमाता अन्तःकरण
तिविंबितचैतन्यमित्यर्थः एतदेव स्पष्टं व्याकरोति । काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषिद्धानि नरकाद्य
निष्टसाधनानि ब्रह्महिंसादीनि नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्य

राम ३

नुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधनानि कृच्छ्रचांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमान
सव्यापाररूपाणि शांडिल्यविद्यादीनि एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं उपासनानां तु चित्तैकाग्र्यं विविदिषंति यज्ञे
नेत्यादिश्रुतेः तपसा कल्मषं हंतीत्यादिस्मृतेश्च नित्यनैमित्तिकप्रायश्चित्तोपासनानां चावांतरफलं पितृलोकसत्यलो
कप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः साधनानि नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोग
विरागशमादिषट्कसंपत्तिमुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमि
ति विवेचनं ऐहिकानां स्रक्चंदनवनितादिविषयभोगानां कर्मजन्यतयानित्यत्ववत् आमुष्मिकाणामप्यमृ
तादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिः इहामुत्रार्थफलभोगविरागः शमादयस्तु शमदमोपरतितिति
क्षासमाधानश्रद्धाख्याः तत्र शमस्वरूपलक्षणमाह शमस्तु तावत् श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः यथा तीव्रा
पोडक्षुधाया जाततापाभिजनादन्यापारे मनसो न वर्तते भोजने वांछलवेन सहते तथा स्रक्चंदनादिविषयसंतप्त

के॰टि॰
४

चि॰ तत्कालमाधर्मेस्मश्रवणामननादिषुश्रंसंतमभि इर्ष्याविपदाजायेत तदापदेवाभ्रमावलानश्रवणादिसाधनेभ्यः उ॰ीयते क
र्तृत्वादिविषयेणामनामनः पेनांतत्कत्वाद्विशेषेणनिवृत्तेमनवृत्तिविक्षेपः शमइत्यर्थः इदानींदमस्य लक्षणमाह ॥ २८
मोषोहिद्रियाणांतद्यतिरिक्तविषयेभ्योनिवर्तनं॥ तानश्रवणश्रवणादिसाधनेभ्योविलक्षणेषुशब्दादिविषयेषुप्रवृत्तेभ्यो
नानिन्द्रियाणीतिनिवार्यदृष्टियाणिपतत्तविशेषेणनिवर्तनं तेमदमइत्यर्थः इदानींउपरतेर्लक्षणमाह॥ निवर्तितानां तेषां
तद्यतिरिक्तविषयेभ्यः उपरमणमुपरतिः॥ निवर्तितानांतेषांमेववाह्येंद्रियाणांश्रवणादिसाधनंत्यक्त्वाशब्दादि
विषयेषुतानांदिणामिष्टयानामंष्ठितितथांतेषांनियदेपेनवृत्तिविशेषेणाविषयेभ्योपरतिरित्यर्थः उपरतेर्लक्षणांतरमा
ह॥ अथवाविहितानांकर्मणांविधिनापरित्यागः॥ विहितानांनित्यादीनांकर्मणांविधिनावानुप्रस्थाश्रमस्वीकारकर्मणापरित्या
गःतदाहकर्तेसपवश्यानमुपरतिरित्यर्थः॥ तितिक्षायालक्षणमाह॥ तितिक्षाशीतोष्णादिद्वंद्वसहिष्णुता॥ शरीरपरिम्स्प्रशीतो
ष्णादिस्तलक्षणसुखदुःखादेश्रपशरीरतालकुंमशकान्त्वानप्रकाशादिदुःखेष्वामनिवशीतोष्णोदरसंनाभावादितिविवे
रामः
४

कंदेपि नामिथ्याभावस्य शीतोष्णादिद्वंद्वस्य पक्षस्य हननं सा तितिक्षा इत्यर्थः इदानीं समाधानस्य लक्षणमाह । निगृहीतस्य मनसः
श्रवणादौ तदनुगुणविषये च समाधिः समाधानं । शब्दादिविषयेभ्यो निगृहीतस्यांतःकरणस्य श्रवणादि तदनुगुणविषयेषु तदुपका
रकेषु अमानित्वमदंभित्वादिसाधनविषयेषु समाधिर्नैरंतर्येण तच्चित्तं जनं समाधानमित्यर्थः श्रद्धादय स्पष्टार्थाः गुरूपदिष्टवेदांतवा
क्येषु विश्वासः श्रद्धा मुमुक्षुत्वं मोक्षेच्छा एवंभूतः प्रमाताधिकारी । तथा चैवोक्तं सकलविशेषणविशिष्टप्रमाताधि
कारी इत्यर्थः अस्मिन्नर्थे च निष्प्रमाणपोति । शांतो दांत इत्यादिश्रुतेः उक्तं च प्रशांतचित्ताय जितेंद्रियाय च प्रहीणदोषाय यथोक्तकारि
णे गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे इति । यथोपदेशं विषयं निरूपयति । विषयो जीवब्रह्मैक्यं शुद्धचैत
न्यं प्रमेयं तत्रैव वेदांतानां तात्पर्यात् । अविद्याध्यारोपितसर्वज्ञत्वं किंचिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं शुद्धचैतन्यं तदैक्यप्रमेय
रूपमेव सर्वेषां वेदांतानां तात्पर्यात् । अविद्याध्यारोपितसर्वज्ञत्वं किंचिज्ज्ञत्वादिविरुद्धधर्मपरित्यागेनावशिष्टं शुद्धचैतन्यमेव ।
रूपमेव सर्वेषां वेदांतवाक्यानां विषय इत्यर्थः संबंधं लक्षयति । संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमा

त०दी०

५

णास्य च बोध्यबोधभावलक्षणः। बोध्यबोधकभावश्चेति बोधस्य ब्रह्मात्मैक्यस्वरूपस्य बोधकस्यैवं॥ तथा ह्यस्य च बोध्यबोधकभा-
व एवास्य संबन्धः। अविशिष्टप्रयोजनं तमाह प्रयोजनं तु तद्विषयकप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावाप्तिश्च। ब्रह्मात्मैकत्व-
लक्षणादिज्ञानाद्गतस्य ज्ञाननिवर्तकपरिस्फुरणे निवृत्तिः पुनरस्य तस्याभावस्य स्वस्वरूपात्मकानंदप्राप्तिः फलमिति सर्वत्र लोके
प्रसिद्धं केवलसाध्यस्य सर्वोत्कृष्टः पुरुषार्थत्वेन फलत्वं दृष्ट। अत्रानिष्टप्राप्तस्याऽऽत्मस्वरूपस्य कृपास्य अन्यथाभावेन पुरुषार्थत्वाभा-
वात् रूपफलत्वमिति चिन्त्य तस्यैव पुरुषार्थत्वमिति नियमाभावात् यथा लोके कस्यचिद्विस्मृतकंठमणेः स्वरूपतः कस्यचि-
त्स्वमानस्यापि प्रोषितेनोक्तः कंठगतचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टं एवमत्रापि नित्यप्राप्तस्यात्मनः स्वरूपा-
नंदस्य प्रकाशेनाप्राप्तत्वेन विस्मृतस्य स्वरूपस्यागन्तुकस्येवावाप्तत्वेन आवरणानां नष्टस्य ज्ञाननिवर्तकप्रमाणस्य निवृत्तौ सत्यां स्वप्रकाशमान नि-
रूपस्यात्मसिद्धस्यैवात्मनः फलत्वमुपपद्यत इत्यर्थः उक्तेऽर्थे श्रुतिं प्रमाणयति तरति शोकमात्मविद् ब्रह्मविद् ब्रह्मैव भवतीत्यादिश्रुतेरि-
त्यनुबन्धान्नामारंभणीयमिति वादिनामधिकारिप्रतिपादितान्निरूपणानन्तरं ग्रन्थारंभं मन्वानोऽभि अथ वा लक्षितं साधिकारिणः कर्तव्यं दर्शयति अप

दर्पो

५

अधिकारिजनमस्यादिं समाधानलसं तं तसोप्रदीसशिवाजलशायिमिदं पप्पश्याः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसत्तत्तमनुस्म
ति उक्तलक्षणलक्षितो बुद्धिमान्निरहितोऽधिकारी गुरुमुपसत्य तमनुसरतीति संबंधः ननु संसारासक्तचित्तस्य विषयालो
लुपस्यार्जितहितस्य गुरूपसर्पणामपुक्तिसंभाव्यते कथमस्य समाधानलक्षतसेति त्यंतसेह तुमारुजनेनेति आदिशब्देन यज्ञपानादि
संसतसेय गुरूपसर्पणामत्यद्धंतमा प्रदीप्तशिरास्यति अहं दग्धमस्तकोऽदाहजिहासुर्जिकामो जलाशयाशी तत्जलराशि
मनुसरति तथा संसारतापत्रयदंदह्यमानस्तन्निवृत्तिकामो मस्तस्वरूपजिज्ञासुः संसारातिवर्तिनं श्रोत्रियं ब्रह्मनिष्ठं फलरतलामलक
वत्तस्यक आत्मस्वरूपसमर्पकं गुरुं समीपं गत्वा अनुसरति मनोवाक्कायकर्मभिः सेवेत इत्यर्थः अस्मिन्नर्थे श्रुतिप्रमाणं प्रति
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतेः अथ गुरुः किं करोतीत्याह मयर महरूपपाशमयोपापरादत्याये नैनमुपदिशति समपूर्वोक्तिप्र
स्वे तं शिष्यं उपदिशतीत्यन्वयः परमकरुणया समाप्य स्वस्वरूपे कस्मादुपदिशतीत्यत आह कृपयेति कृपायति नसाधनान्तराभा
वादित्यर्थः ननु अस्य स्वस्वरूपस्यागोचरत्वेनऽपदेष्टुमशक्यत्वात् कथमुपदिशतीत्यत आह अध्यारोपेति अध

वे०सा०

उ ब्रह्मस्वरूपमपि विधिमुखेनोपदेष्टुं शक्यतेऽपि नेह नानास्ति किंचनेत्यादिश्रुतिमनुसृत्य अविद्याध्यारोपितमिथ्यानानाप्रप
चनिषेधमुखेनोपलक्षितं अखंडचैतन्यमेव पुनः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनाप्युपदिश्यत इति भावः
तत्र श्रुतिमाह ९ तस्मात्सर्वविद्यानुपमन्यायमाह न्यायादिश्रुते १ अस्मिन्नर्थे लौकिकदृष्टांतमाह ९ असर्परूपायां रज्जौ सर्पारोपवद्वस्तु
न्यवस्त्वारोपोऽध्यारोपः १ व्यावहारिके वस्तुत्वेनाभिमते रज्जौ अवस्तुभूतसर्पारोपेणाभ्रमरज्जवव्यवस्थितेदैवमनिष्ठाऽदिषोपादानेत्वेन
नांपसर्प इति किं तु रज्जुविशेषदर्शनेनाज्ञातकाले नाधिष्ठानरज्जुमात्रस्यात्मकारोपान्यज्ज्ञानानिवृत्तो सर्पभ्रांतिनिवर्त्तते इत्यर्थः उक्तमर्थं दार्ष्टां
तिके योजयति १ वस्तु सच्चिदानंदाद्वयं ब्रह्म कालत्रयानपायात्मैव वस्तुशब्दार्थः तत्त्वाऽवस्तुस्वरूपमाह अज्ञानादिसकलजडसमूह
होऽवस्तु १ अज्ञानतत्कार्ययोर्मिथ्यात्वात तदुपयत्वा तन्मायापवत्वान्निद्धिकाभित्वात्तथापदृष्टिदृष्टिकल्पत्वादिहेतुभिरवस्तुत्वमित्यर्थः
एतदेव विस्तरेणोपपादयितुमज्ञानस्वरूपं तावदाह अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्कि
चिदिति वदंति १ किमिदमज्ञानं सद्रूपमसद्रूपं वा नाद्यः तस्य शशविषाणादिवत्त्वे नतुच्छत्वात नापि द्वितीयः असतः कारणत्वानुपप

राम

६

त्वेभित्यादिहेतुभिः सेयं नाकेवलं नवा निरूपयितुं न शक्या तत्त्वेनान्यत्वेन इत्यत आह अनिर्वचनीयमिति । ननु अज्ञानं सा निर्वचनीयत्वे सदसद्वा
स्यात् उभयरूपत्वात्तदभावप्रसंगमाशंक्याह त्रिगुणात्मिकेति अजामेकामित्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मकत्व
प्रतिपादनादित्यर्थः । न त्वेवमज्ञस्यानादेः श्रुतिप्रसिद्धस्य व्योमादिरूपेणाविर्भावः उक्तं भगवता दैवी ह्येषा गुणमयी सा तत्त्वम
हमात्मनिवेनसंसाराणि हरिमायां करोतीत्यनादिरेवीति एतादृशमज्ञानमात्मसाक्षात्कारेणानिवर्तते इत्यर्थः तदुक्तं भगवता
दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते १ ज्ञानाभाव एवाज्ञानमिति तार्किकमतं निरा
करोति भावरूपमिति । त्रिगुणात्मकत्वे भावरूपत्वे च सिद्धे इत्यमेवेति तिथिं डीकृ सम्यग्ज्ञापितुं न शक्यत इत्यत आह प्रतिक्ष
पादिति । किं प्रत्यक्षं घटादिवन्नोपलभ्यत इत्यर्थः अनिर्वचनीयत्वादिभावरूपाज्ञाने प्रमाणं वक्तुं अनुभवैकवेद्यत्वरूपं दर्शयति अह
मज्ञ इत्यनुभवात् । अहं मूढो मामहं च न जानामि इत्यपरोक्षानुभव एव प्रमाणमित्यर्थः तस्मै दीपं प्रकल्पयेति श्रुतेः मुदाहरति ।
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च ज्ञानानि विभजते इदमिति २८ मन्नानं समष्टिव्यष्टिरूपाभिप्रायेणैकमनेकमिति च

व्यवच्छिद्यते । वस्तुतोज्ञानस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते व्यष्ट्यभिप्रायेणानेक इत्यर्थः एतदेव प्रपं
वे०टी० ७ चयितुं प्रतिजानीते तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः यथा बहूनां वृक्षाणां समुदायविवक्षया व
नमित्येकत्वव्यपदेशः यथा जलानां समष्ट्यभिप्रायेण जलाशय इति । यथा वा बहूनां घटादिजलानां समुदायविवक्षया जलाश
य इत्येकत्वव्यपदेशः तथांतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षयाऽज्ञानमित्येक
त्वव्यपदेश इत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति अजामेकामित्यादिश्रुतेः ॥ इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधा
नानाज्ञानजीवगतनिकृष्टांतःकरणाद्युपाध्यपेक्षया समष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति विगताशेषाविद्यादिरूपसकलकार्यप्रप
ञ्चस्य जगत्कारणस्य तदज्ञानस्य समष्टिभूतोपाधित्वेन विशुद्धसत्वप्राधान्यमित्यर्थः ॥ तथा नानात्वेन प्रतिभासमानजीवगताज्ञा
नानां समष्ट्यभिप्रायेणैकत्वव्यपदेशः । अंतःकरणोपाधिभेदेन नानात्वेन प्रतीयमानानां जीवगताज्ञानानां समुदायविवक्षया रा० ७
एकत्वमित्यर्थः एतत्समष्ट्युपाधिद्वारा ईश्वरचैतन्यं लक्षयति । एतदुपहितं चैतन्यं सर्वज्ञत्वईश्वरत्वसर्वनियंतृत्वादिगुणकम

व्यक्तं मे तयोर्मिर्जगत्कारणत्वमिति व्यपदिश्यते ॥ सर्वेषां जीवानां कर्मानुरूपेणेशितृत्वेन फलदातृत्वेनेश्वरत्वमुच्यते तत
थाव सर्वेषां जीवानां प्रेरकत्वेन नियंतृत्वमुच्यते ॥ प्रमाणागोचरत्वादव्यक्तमित्युच्यते ॥ तथा सर्वेषां जीवानामंतर्हृदये स्थितत्वादु
द्दिनियामकत्वेनांतर्यामीत्युच्यते सर्वस्य चराचरात्मकप्रपंचस्य विवर्त्ताधिष्ठानत्वेन जगत्कारणत्वमिति च व्यपदिश्यते तस्यैव
॥ उक्तार्थे युक्तिमाह ॥ सकलानां जीवानामवभासकत्वात् ॥ अत्र प्रमाणमाह ॥ एष सर्वेश्वर सर्वविदित्यादिश्रुतेः ॥ इदानींतस्यैव स्वरूपसमु
सायोपाधिविवेकाय कारणशरीरमानंदमयकोशत्वं सुषुप्त्यवस्थां च दर्शयि स्यचलमतद्भूतमाह ॥ अस्येति ॥ अस्य परमेश्वरस्य समष्टि
विश्वलकारणात्मा कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयः कोशः ॥ कारणशरीरत्वे हेतुमाह ॥ अखि
लेति ॥ आनंदमयत्वे हेतुमाह ॥ आनंदप्रचुरत्वादिति ॥ कारणत्वादस्यापि प्रकृतिपुरुषमात्रव्यतिरिक्तस्य स्थूलकार्यप्रपंचस्य
वाभावानंदबाहुल्यमिति कोशत्वे युक्तिमाह ॥ आच्छादकत्वादिति शरीराच्छादकत्वमेव दर्शयति । तमाच्छादकत्वाद् ज्ञानस्य कोश इतिव
वकारस्यार्थः ॥ ननु तथापि कारणात्मोपाधेरज्ञानस्य सुषुप्तिसंबंधः कुतः इत्यत आह ॥ सर्वोपरमत्वात् सुषुप्तिः ॥ सर्वस्थूलसूक्ष्मोपाधेः कार

रोपाधौ लीनत्वात्सुषुप्ति रित्यर्थः ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशंक्य संज्ञाभेदान्न वस्तुभेद इत्याह अत एवे
वे.टी.१ त्यस्थूलसूक्ष्मालयस्थानमिति चोच्यते यतः कारणं तत्सुषुप्तिं तत्र अतः पंचीकृतापंचीकृतस्थूलप्रपंचविलयरूपेदानीमभिप्रायस्य जाग्र
८ द्वस्थाविशिष्टस्यापंचीकृतमपंचीकृतकार्यस्य स्थूलसूक्ष्मप्रपंचस्य लयस्थानमिति चोच्यते इत्यर्थः समष्टिरूपाज्ञानं सप्रपंचं
निरूप्येदानीं व्यष्टिमज्ञानं निरूपयितुं दृष्टांतोक्तावतारयति यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः यथा
जला शयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः यथा वृक्षसमुदायस्य वनत्वेन रूपे
णैकत्वव्यवहारेऽपि प्रत्येकं वृक्षविषयानेकत्वापेक्षया बहुत्वोक्त्या तिष्ठतीति बहुत्वव्यवहारः यथा वा पीकूपतडागादिस्थजलसमुदाय
विवक्षया जलाशयत्वेनैकत्वव्यवहारेऽपि प्रत्येकं वाप्यादिविवक्षया बहुविजलानीति तिष्ठतीति बहुत्वव्यवहारः तथा समष्टिरूपत्व राम
कारणाज्ञानस्य समुदायरूपेणैकत्वेऽपि अहंकारादिकार्यभूतानेकजीवगतानानाज्ञानानामनेकविवक्षया बहुत्वव्यवहार ८
इत्यर्थः अभिन्नत्वे श्रुतिप्रमाणोपपत्तिं दर्शयति इंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः ननु तथापि एकस्यैवाज्ञानस्य ह

दवच्छिन्नचैतन्यमस्य व्यष्टिसमष्टिताकृतं तदुपपत्तिमाह अस्य सत्वलसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः भे
दविरूपायाव्यष्टेस्तिरोधानाद्विवक्षा अभेदविवक्षयासमष्टित्वं समष्टिरित्यादिवाक्यस्यार्थः तत्र महाप्रलयकालीनसमष्टि
मत्तविशुद्धसत्त्वप्रधाना माया (मूलप्रकृतिः सकाशादैनंदिनप्रलयकालीनव्यष्ट्युपाधिमत्तज्जीवमत्कृते भेदं देशी
यति एवं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना एवं जीवगतसुषुप्त्यवस्थापन्ना हंकारादिलिङ्गोपमेरकारणरूपा निकृष्टोपा
धित्वेन मलिनसत्त्वप्रधानेत्यर्थः अनेनोपाधिनावच्छिन्नं चैतन्यं मल्लरूपमिति एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्यु
च्यते अत्रोपपत्तिमाह ३ एकाज्ञानावभासकत्वात् स्पष्टागतमलत्वान्मलिनजीवगताहंकारादिलिङ्गोपाधिकारणरूपत्वानुभव
बलेन एकत्वेन तदवभासकेश्वरजीवचैतन्यमपेक्ष्यैकत्वमित्यर्थः सौषुप्तजीवचैतन्यमस्पष्टोपाधितया प्राज्ञ इति अस्य प्राज्ञत्वमस्पष्टोपा
धितया अनतिप्रकाशकत्वात् अस्यापीयं व्यष्टिरहंकारादिकारणत्वात् कारणशरीरत्वमानन्दप्रचुरत्वात् देवहेतोरानन्दमयकोश
संस्कारस्या (स्पष्टोपाधिगततया नतदाश्रयत्वेनातिप्रकाशकत्वाभावात् प्राज्ञत्वमस्येत्यर्थः यथाज्ञानात्कारणोपाधेः
कारणशरीरत्वमानन्दप्रचुरत्वेन चानन्दमयकोशत्वं कोशवदाच्छादकत्वेन च केषांचित्तथा तस्य चैतन्यस्य आनन्दमयात्मत्वमपि तमे

वे०टी०
१८

ष्यतीति दर्शयति ॥ अहंकारादीति ॥ प्रलयकाले हि रागाणामभी दिसंपंचीवोसाद्के स्थूलस्य प्रलये तु सुषुप्तिकाले अहंकाराद्यशरीरैतास्य
सिस्कामात्रावशिष्ट जीवगतानां तेषामपि कारणशरीरांतर्वे इंद्रियतद्विषयाभावेन व्यासंगाभावादानंदस्वाभाव्यमात्माच्छादकत्वात्तत्स्वा
तंत्र्यमयकोशत्वमुपपन्नमिति भावः ॥ ननु स्थूलसूक्ष्मशरीरविलयस्यानुभवं कथं सुषुप्तिपदवाच्यत्वमित्याशंक्य पूर्ववत्तत्रापि भेदो न वस्तु
भेद इति वक्तुं तत्र सुषुप्तिमाह ॥ सर्वोपरमत्वात्सुषुप्तिः स्थूलसूक्ष्मशरीरविलयस्थानमिति चोक्तेः पंचीकृतस्य स्थूलप्रपंचस्य समष्टिक
स्यापंचीकृतेन सूक्ष्मशरीरेण सह पंचीकृतमहाभूतकार्यस्य विलीनत्वात् तस्यापि स्थूलादिभौतिकस्य स्वकारणप्रपंचस्य स्वकारणात्मने लीन
त्वात्सर्वोपरमत्वमित्यर्थः ॥ तथा चोक्तं ॥ लोपेके तस्मात्सुषुप्तौ बाधोपलब्धत्वं तयोः तस्मापि विलयनीरेतिरूपमेतेषु सुषुप्त्यवस्थायां वस्तु
के भेदोपीरस्य लयस्थानत्वाति स्वास्थिकं तत्र येमच्छिदानंदः पर्यवस्यतीति मासिद्धमिति १ ननु प्रलयकाले सुषुप्तिकाले च सूक्ष्मतः
करणानां वृत्त्यभावेन ज्ञानेंद्रियादिकाभावादानंदस्याप्युपलब्धिविभ्रमाणामभावात्साक्षी कथं परिस्फुरतीति तदानीमेतौ स्वरूपात्मनौ वे
तनसदीक्षा विषयनिरस्ताभिरस्तानंदविशिष्टरानंदमनुभावः ॥ ननु पापासंपृक्तत्वेनानंदकरणाभावात्तत्त्वं ज्ञानं गीर्यते तथा चेत् न सदीनामान्तानंदस्या
दिसद्भूतत्वपरस्य निष्पत्ते तथा च स्मर्यते स्वकीयाज्ञानशक्तिविशिष्टानंदस्वरूपमनुभवति जीव इत्यपि तस्य तु मात्रावशिष्टत्वात्पा
स्वा

राम
१८

त्तानप्यवृत्तिभिः स्वात्मानंदं वा तुल्यं तारतम्येनानुभवतीति भावः अत्रैवोपष्टंभकत्वेन श्रुतिमवतारयति आनंदभुक् चेतोमुख इत्यादि-
श्रुतेः ॥ ८ ॥ तत्कालीनसुखपरामर्शोपपत्तिरपि पूर्वानुभूततत्सुखस्य वा तुल्यानुभवमस्त्वेव प्रमाणयामित्याह सुखमहमस्वाप्सं न किंचिदवेदि-
षमिति सुप्तोत्थितस्य परामर्शोपपत्तिश्च सुखमहमस्वाप्सं न किंचिदवेदिषमित्यज्ञानपरामर्शः तथा च सुषुप्तिदशायां प्रलयकाले च प्राज्ञेश्वरावज्ञान-
वृत्तिभिरानंदमनुभवतः ॥ ९ ॥ स्पष्टार्थः इदानीमीश्वरस्य तमसा ज्ञानस्य जीवगतं संस्कारमात्रावशिष्यत्वे ज्ञानस्य च समष्टिव्यष्ट्यभिप्रायेणाभिधमान-
त्वेऽपि वस्तुभेदो नास्तीत्येतद्दृष्टांतमाह ॥ अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाऽभेदः ॥ उक्तोपाधिद्वयप्रकारेणावस्थितयोपार-
ऽप्यभेदं दृष्टांतमुखेन दर्शयति ॥ १० ॥ एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिवा-
भेदः ॥ ११ ॥ वनावच्छिन्नाकाशवत्प्राज्ञेश्वरवृक्षावच्छिन्नाकाशवत्तथा जलाशयजलगतप्रतिबिंबाकाशवज्जलगतप्रतिबिंबिताकाश-
वत्तत्कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य चैव स्तुतोऽभेदः ॥ स्पष्टार्थः अत्र प्रमाणमाह एष सर्वेश्वर एष सर्वज्ञ इत्यादिश्रुतेः ॥ तथा चो-
पाधिकार्योपाधिरूपं जीवकारणोपाधिरीश्वरः कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यत इति ॥ १२ ॥ उपाधिद्वयावच्छिन्नौ प्राज्ञेश्वरौ समष्टिं च निरूप्ये-
दानीमनवच्छिन्नं तुरीयं चैतन्यं रूपयति ॥ १३ ॥ तदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवद्

रणाश्रा क्रित्वावत आत्मोपिपि ग्रथोऽनेकपा जनमापतमादित्संडमवलो कपिन नपन पथपिधापक जपापयाऽध्यारपती काथाऽज्ञानं परिच्छिन्नमपि
आत्मानमपरिच्छिन्न तुद १९

वे॰टी॰ ५ नपारस्तानतदुपहितंचैतन्यंपारमेश्वरंसंजपदनुपहितंचैतन्यंत तुरीयमिति चोच्यते + यथा स्थूलवनोपधावछिन्नाकाशापेक्षयाऽसमष्टिरूपा
धावछिन्नाकाशापेक्षयारूपा वमस्तकाशस्यतदुभयाधारतयाऽनवछिन्नत्वात्तुरीयत्वं तथाकूपिकारणोपाधितदवछिन्नचैतन्यस्य व्यापेक्षया रूपातद
धारभूतं जपदनवछिन्नं सर्वव्यापीचैतन्यंविष्णुदतुरीयमिति चोच्यते अस्मिन्नर्थेश्रुतिसंवादयति शिवमद्वैतंचतुर्थंमन्यते इत्यादि एकं तेनैतत्स्वविष्णु
दचैतन्यंतदेवपदैतत्त्वचैतन्यदृष्टेनसहैकत्वविपरूपाममहावाक्यस्यवाच्यत्वंलभते भेदरहितवस्त्वपाच्यलक्ष्यत्वंलभतइत्याह इदमेवशुद्धचैतन्यंतुरी
यमज्ञानतदुपहितचैतन्याभ्यामविवेकं सत् वपपिंडवदाध्यत्वं तन्नसामान्यविंडच्छिन्नविवेकं सत्वरूपत्वमिति वाक्यते तत्वपायांचैतन्यांतदेतन्महत्वंतरू
पीणिकत्वेपिअवछिन्नानवछिन्नत्वेन रूपोपाधावाच्यत्वलक्षत्वंभवतः इतिभावः अधेदानींमकाशावि रूपस्यात्मनः कथं कृतम
कास्मकत्वं कथंवा सर्वोपादानमकाशात्मनः आकाशादिप्रपंचजनकत्वमित्येतन्महाविधिधपरिहारायाऽज्ञानस्य शक्तिद्वयं निरूप्यते त्व
स्याज्ञानस्यावरणाविक्षेपनामकशक्तिद्वयमस्ति एतेषुवनामतो निरूपयति आवरणशक्तिस्ताव तमसि द्विदानेदस्वरूपमावृणोति तथापरमात्मा किं
ब्रह्मादिस्थावरांत जगत लपुदुरकुलामरूपात्मकं विविक्षिपतिसजतीति विक्षेपशक्तिरितिशक्तिद्वयमज्ञानस्येत्यर्थः ननु अपरिच्छिन्न
स्वप्रकाशचिद्रूपोऽस्वरूपरिपत्नीस्वरूपमात्मनः परिच्छिन्नेनाल्पेनकाऽज्ञानमासाधकेनाज्ञानशक्तिविशेषेणाकथमावरणं मितिसाधकरा
दवस्तुतोऽज्ञानस्याऽत्माच्छादकत्वाभावेपिप्रमातृबुद्धिमात्राच्छादकत्वेवअज्ञानस्याऽत्माच्छादकत्वमुपचारादुच्यते इमततन्माहअयम ५

राम ५

लो९

नमवलोकयितृबुद्धिपिधायकतयाछादयतीवतादृशंसामर्थ्यं यथाल्पोपिमेघोऽनेकयोजनविस्तीर्णमादित्यमंडलमवलोकयि
तृपुरुषदृष्टिमात्राछादकत्वेन आदित्यमाछादयतीत्युपचर्यते तथातितुछापिपरिछिन्नमप्यज्ञानंप्रमातृबुद्धिमात्रा
छादकत्वेनात्मानमाछादयतीत्युपचारादुच्यते ३ तपर्थः अस्मिन्नर्थे वृद्धसंमतिमाह तदुक्तं घनछन्नदृष्टिर्घनछन्न
मर्कं यथामन्यतेनिःप्रभंचातिमूढः तथाबद्धवद्भातियोमूढदृष्टेः सनित्योपलब्धिस्वरूपोहमात्मेति अनयैवावरणश
क्त्यावछिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुछसंसारसंभावनाप्युपपद्यत इत्याह ४ अनयावृतस्यात्मनः कर्तृत्वभो
क्तृत्वसुखदुःखित्वादिसंसारसंभावना अपि संभाव्यते ३ इयमेवावरणशक्तिरात्मनो भेदबुद्धिजनकत्वेन संसारहेतुरिति भावः अत्रानुरूपं दृ
ष्टांतमाह ४ यथा स्वाज्ञानेनावृतायां रज्ज्वौ सर्पत्वसंभवना । यदुक्तमसंयोगादासीनात्मनः कथंजातुरसात्त्वमिति तंनिराकर्त्तुं वि
क्षेपशक्तिमाह ५ विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमज्ञानमपि स्वावृतात्मनि विक्षेपश गो८
क्त्या आकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं । यथा रज्जुविषयकमज्ञानं सर्पमुद्भावयति तथात्मविषयकमज्ञानमपि

११ त्वेवच्छिन्ने आत्मनि विक्षेपशक्तिप्रभावेन आकाशादिप्रपंचकमुत्पादयतीत्यर्थः अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति तदुक्तं वि
क्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेत् ५ ननु किमात्मा चराचरात्मकस्य प्रपंचकस्य निमित्तकारणं उपादानं कारणं वा नाद्यः दं
डादिवत्स्वकार्यव्यापित्वं न स्यात् आत्मनः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्यादिसिद्धं कार्यव्यापित्वश्रवणात् न द्वि
तीयः अचेतनस्य जडस्य प्रपंचस्य चैतन्योपादानत्वासंभवात् उपादानत्वे न च कार्यकारणयोरभेदेन प्रपंचस्यापि चैत
न्यरूपत्वप्रसंगात् अनित्यत्वं न स्यादित्याशंक्य जडप्रपंचं प्रत्यात्मनः चैतन्यप्राधान्येन निमित्तत्वं स्वाऽज्ञानप्रधा
न्ये नो[illegible]पादानं च संभवतीत्याह ८ शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्राधान्यतया निमित्तं स्वोपाधिप्राधा
न्यतयोपादानं च संभवति यथा अयःकांतस्य सन्निधानेन जडमयं चेष्टते तथा चैतन्यसंनिधानेन जडमज्ञानं चेष्टते तस्याज्ञानविकारप्र
तिचैतन्यस्य निमित्तत्वं जडप्रकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायिन ईश्वरस्यापि परंपरयोपचारादुपादानत्वं तदु वि१
ध्यतःस्वपदेः यदुक्तं चैतन्यस्य निमित्तकारणत्वे कारणत्वे कार्यानुप्रवेशो न स्यादिति तन्न कारणस्य कार्यानुप्रवेशनिय

मस्योपादानत्वं न निमित्तकारणत्वविषयत्वेन निमित्तकारणत्वविषयत्वाभावात् ननु स्वच्छेत्यादिश्लोकैरप्युपादानकारणपरत्वात्त
यदप्युक्तं आत्मन उपादानकारणत्वे प्रपंचस्यानित्यत्वं न स्यादिति तदपि न तस्य परिणामविषयत्वेन विवर्त्तविषयत्वाभा
वात् प्रपंचस्य ब्रह्मविवर्त्तत्वात् विवर्त्तत्वं च स्वस्वरूपापरित्यागेन स्वरूपांतरप्रदर्शकत्वं यथा रज्ज्ववच्छिन्नचैतन्यस्थिताऽ
ज्ञानस्य रज्जुस्वरूपापरित्यागेन सर्परूपांतरप्रदर्शकत्वं तथा ईश्वरचैतन्यनिष्ठाऽज्ञानशक्तेरपि चैतन्यस्वरूपापरित्यागेनाकाशादिस्व
रूपांतरेणाप्रदर्शकत्वं एतावताऽकाशादिप्रपंचस्यानित्यत्वं न संभवति अज्ञानस्य मिथ्यारूपत्वेन तत्कार्यस्याकाशादिप्रपंचस्यापि मि
थ्यात्वात् न चैवमज्ञानस्य मिथ्यात्वे तत्स्वप्नपुरुषबंधमोक्षयोरपि मिथ्यात्वमिति वाच्यं इष्टापत्तेः तदुक्तं भागवते । बद्धो मुक्त इति व्याख्या
गुणतो न मे वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनमित्यल्पमतिविस्तरेण ॥ एकस्यात्मनो निमित्तोपादानकारणत्वे दृष्टांत
माह यथा लूतातंतुः स्वकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्राधान्यतयोपादानं च संभवति यथा लूतातंतुस्वात्म्यमानं
तंतुलक्षणं कार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं चैतन्यसंनिधानव्यतिरेकेण जडस्य देहस्यानंतशरीरवत्तंतुजनकत्वसंभ
वात् स्वशरीरप्राधान्येनोपादानं च भवति शरीरस्य तक्षातंतूपादानत्वे न तदवच्छिन्नचैतन्यस्याप्युपादानत्वोपचारात् एवमी

१२ ईश्वरस्यापि स्वचैतन्यप्रधानतया निमित्तत्वं स्वोपाधिप्रधानतयोपादानत्वं च भवतीत्यर्थः ॥ इदानीं विक्षेपशक्तिकस्तु[illegible]माह ॥ तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुरग्निरग्नेरापः अद्भ्यः पृथ्वी चोत्पद्यते । आकाशादेर्जडत्वात्तमोगुणप्राधान्यविक्षेपशक्तियुक्ताऽज्ञानावच्छिन्नचैतन्यस्यैव आकाशादिप्रपंचजनकत्वमिति भावः ॥ अस्मिन्नर्थे श्रुतिप्रमाणयति ॥ एतस्माद्वा एतस्मादात्मनः आकाशः संभूतः इत्यादिश्रुतेः ॥ एतेनार्थात्सांख्यनैयायिकपक्षौ निरस्तौ । प्रकृतेरज्ञानस्य शक्तिमत्परतंत्रत्वात् स्वतंत्रस्य तस्यैकस्याऽज्ञानस्य जगत्कारणत्वानुपपत्तेः ॥ ईक्षतेर्नाशब्दरचनानुपपत्तेश्च ॥ नानुमानमित्यादिन्यायः ॥ तन्निरवयवत्वाच्च परमाणोरपि षडकेदोषग्रासग्रासानपायात् अभिन्ननिमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति सदेव सोम्येदमग्र आसीत् एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते बीजं मां सर्वभूतानामित्यादिरीश्वरस्यैव जगत्कारणत्वप्रतिपादनात् सांख्यकल्पितमतं प्रधानं अशब्दं ईक्षि[illegible]त्वेऽचेतनत्वप्रतिपादनात् ननु आकाशादिजनकत्वमित्य प्रपंचोत्पादकचैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधान्यमित्याशंक्याह ॥ तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्का

रणस्य कारणगुणा कार्यगुणानारभंते इति न्यायादिति भावः ॥ न च त्रिगुणात्मकत्वाद ज्ञानस्य कथं तमोगुणमात्रप्राधान्येन आ
शा २ काशादिजनकत्वमित्याशंक्याह ॥ तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषु उत्पद्यंते ॥ तदानीमुत्पत्तिवेलायां स
त्वादयस्त्रयो गुणास्तारतम्येन कारणप्रक्रमन्यायेन तेष्वाकाशादिषु पंचभूतेषूत्तरोत्तराधिक्येन जायंत इत्यर्थः ॥ इमान्येव सूक्ष्म
शरीरादिकारणभूतान्यपंचीकृतानि सूक्ष्मरूपपंचभूत तन्मात्राणीत्युच्यंत इत्याह ॥ एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंची
कृतानि चोच्यंते तदुक्तं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्माख्यं भोगसाधनमिति वचना
दपि ॥ अपंचीकृतभूतेभ्योऽपंचीकृतसूक्ष्मशरीराणि पंचीकृतस्थूलभूतेभ्यः स्थूलशरीराणि स्थूलभूतानि चोत्पद्यं
ते ॥ सूक्ष्मशरीरस्वरूपमाह ॥ सूक्ष्मशरीराणि तु सप्तदशावयवानि लिंगशरीराणि ॥ सूक्ष्मशरीरस्वरूपभूतान
वयवानाह ॥ अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं ॥ ज्ञानेंद्रियाण्याह ॥ श्रोत्रचक्षुस्त्वक्जिह्वा
घ्राणाख्यानि सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते सात्विकांशाद्वायोस्त्वगिंद्रियं सात्विकांशात्तेजसश्चक्षुः सात्विकांशाज्जलाज्जिह्वा
सात्विकांशात्पृथिव्याः सकाशाद्घ्राणेंद्रियं चेति क्रमेणोत्पद्यंत इत्याह ॥ इदं त्वाकाशादीनां सात्विकांशेभ्यस्तेभ्यः ए

१२

पृथक्पृथक्क्रमेणोत्पद्यंते बुद्धेर्लक्षणमाह ॥ बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः ॥ बुद्धेर्वाहमिति निश्चयात्मिकांतःक
रणवृत्तिरेव बुद्धिरेवेत्यर्थः मनसो लक्षणमाह ॥ मनो नाम संकल्पविकल्पात्मकांतःकरणवृत्तिः ॥ अहं चिद्रूपो देहो वेति
संशयात्मिकांतःकरणवृत्तिरेव मन इत्यर्थः स्मरणात्मकस्य चित्तस्य गर्वात्मकाहंकारस्य च बुद्धिमनसोरंतर्भाव इत्यर्थः
अनयोरेव चित्ताहंकारयोरंतर्भावः ॥ यद्यप्यंतःकरणत्वेन वृत्तीनामेकत्वं तथाप्येकस्यैव पुरुषस्य पाचक इत्यादिवृत्ति॥भेदाद्भेद
वदेकस्याप्यंतःकरणस्य निश्चयसंशयस्मरणाहंकारविषयभेदे बुद्ध्यादिभेद इति भावः बुद्ध्यादीनां उत्पत्तिप्रकारं दर्श
यति ॥ एते पुनराकाशादिगतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यंते ॥ एतेषां चतुर्णां सात्विकांशेभ्यो भूतेभ्य उत्पत्तौ नि
मित्तमाह ॥ एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्यत्वं ॥ बुद्ध्यादीनां प्रकाशात्मकत्वात्सात्विकांशभूतकार्यत्वमित्यर्थः बुद्धेर्वि
ज्ञानमयकोशत्वं दर्शयति ॥ इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयः कोशो भवति बुद्धेः सत्वकार्यत्वात् ज्ञानेंद्रि
यसाहित्येन प्रकाशाधिक्याद्विज्ञानमयत्वं ॥ आत्माच्छादकत्वात्कोशत्वमित्यर्थः विशिष्टबुद्धिप्रतिबिंबितचिदा १३

त्मनोजीवत्वंदर्शयति ॥ अयंकर्तृत्वभोक्तृत्वदुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामीव्यवहारिकोजीवइत्युच्यते ॥ नतुप्रायःपि
ण्डवद्बुद्ध्यारोपितंचेतन्यंवस्तुतोऽकर्ताऽभोक्तानित्यानंदोऽपरिछिन्नमक्रियमपिकर्तृत्वभोक्तृत्वदुःखित्वपरिछिन्न
त्वंनिरूपयति ॥ मनस्तुज्ञानेंद्रियैःसहितंसत्मनोमयकोशोभवति ॥ सत्त्वगुणप्रधानंमनःसत्त्वगुणांशेभ्योजातंश्रोत्रादिज्ञा
नेंद्रियैरेवसहितंसत्मनोमयकोशइत्युच्यतइत्यर्थः ॥ अत्रतुमनसःसत्त्वोपहितरजोविकारेच्छारूपत्वात्संकल्पविकल्पात्म
कत्वेनतुध्यायेत्कृपयाजाड्याधिक्यात्मनोमयत्वंआत्माच्छादकत्वात्कोशत्वमितिभावः ॥ कर्मेंद्रियाण्युपदिशति ॥ कर्मेंद्रिया
णिवाक्पाणिपादपायूपस्थाख्यानि ॥ एतेषामुत्पत्तौसाधनापेक्षायामाह ॥ एतानिपुनराकाशादीनांरजोंऽशेभ्योव्यस्तेभ्योभू
तेभ्यःपृथक्पृथक्क्रमेणोत्पद्यंते ॥ भूतानांत्रिगुणात्मकत्वेपिरजोगुणबाहुल्येभ्योभूतेभ्योवागादीनिपृथक्पृथक्क्रमे
णजायंतेरजोगुणप्रधानादाकाशाद्वागुत्पद्यते रजोगुणप्रधानाद्वायोःपाणींद्रियं रजोगुणप्रधानादग्नेःपादेंद्रियं
रजोगुणप्रधानाज्जलात्पाय्विंद्रियं रजोगुणप्रधानायाःपृथिव्याःगुह्येंद्रियमुत्पद्यतेइत्यर्थः ॥ वायूंस्तूपदिशतिवायु

१४ वः प्राणापानव्यानोदानसमानाः यथोद्देशं प्राणस्य लक्षणमाह ॥ प्राणो नाम प्राग्गमनवान् नासाग्रस्थायीत्ति ॥ ऊर्ध्वगमन
बा२ शीलो नासाग्रस्थायी वायुः प्राण इत्यर्थः अपानस्य लक्षमाह ॥ अपानो नाम अवाग्गमनवान् पाय्वादिस्थानवर्त्ति ॥ अधो
गमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः व्यानस्य लक्षणमाह ॥ व्यानो नाम विष्वग्गमनवान् अखिलशरीरवर्त्ति
सर्वनाडीगमनशीलोऽखिलशरीरस्थायी वायुर्व्यान इत्यर्थः उदानस्य लक्षणमाह ॥ उदानो नाम कंठस्थानीय ऊर्ध्वग
मनवानुत्क्रमणवायु ॥ ऊर्ध्वं उत्क्रमणशीलः कंठस्थायी वायुरुदान इत्यर्थः समानस्य लक्षणमाह समानो नाम
शरीरमध्यगत अशितपीतान्नादिसमीकरणकः ॥ शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः प्राणादीनां
वायुत्वेन रूपेणैकत्वेऽपि क्रियाभेदेन भेद इति भावः कपिलमतानुसारिणां क्रियाभेदेनान्येऽपि पंचवायवः संतीति वदं
तीत्याह ॥ केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्येऽपि वायवः संतीति वदंति ॥ [illegible]तानेव नामतोऽभिनि
निदर्शयति ॥ नाग उद्गीरणकरः कूर्म उन्मीलनकरः कृकल क्षुत्करः देवदत्तो जृम्भणकरः धनंजयः पोषणकरः १४

तथा चोक्तं उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकलः क्षुत्कृते ज्ञेयो देवदत्तो विजृंभणे न जहाति मृतं चापि सर्व
व्यापि धनंजय इति वेदांतिनस्तु नागादीनां प्राणादिष्वंतर्भावं वदंतीत्याह एतेषां प्राणादिष्वंतर्भावात् प्राणादयः पंचैवेति
केचित् ॥ प्राणादिवायूनां उत्पत्तौ कारणापेक्षायामाह ॥ एवं प्राणादिपंचकमाकाशादिरजोंशेभ्यो मिलितेभ्य उत्पद्यते अपं
चीकृतपंचमहाभूतेभ्यो रजःप्राधान्येभ्यः प्राणादयो जायंत इत्यर्थः एतेषां प्राणादीनां प्राणप्रचुरत्वात् प्राणमयत्वं आ
त्माच्छादकत्वात्कोशत्वं च भवतीत्याह इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयकोशो भवति ॥ प्राणादीनां रजःप्राधान्येन
तत्कार्यत्वे निमित्तमाह ॥ अस्य क्रियात्मकत्वेन रजोंशकार्यत्वं ॥ प्राणादीनां क्रियात्मकत्वाद्रजःकार्यत्वमित्यर्थः एतेषु
पंचसु कोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाशक्तिभेदेन कर्तृकरणक्रियारूपत्वं दर्शयति ॥
एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान् करणरूपः प्राणमयः क्रियाशक्ति
मान् कार्यरूपः मनोमय इच्छाशक्तिमान् करणरूपः प्राणमयः क्रियाशक्तिमान् कार्यरूपः तत्र हेतुमाह ॥ योग्यत्वादेवमेतेषां
विभाग इति वर्णयंति ॥ इदमेव कोशत्रयं सूक्ष्मशरीरमिति व्यवह्रियत इत्याह ॥ एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमि
त्युच्यते ॥

१५ अस्य समष्टिहेतुमाह । अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवत् जलाशयवद्वा समष्टिः एकबुद्धीति
चराचरप्राणिमात्रस्य यावंत्यनंतानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्यप्राणस्य
ऐकबुद्ध्याविषयीकृतत्वात्समष्टित्वमित्यर्थः अत्र दृष्टांतमाह वनवदित्यादि अस्यैव सूक्ष्मशरीरस्य व्यष्टि
त्वं दर्शयति । अनेकबुद्धिविषयीकृतत्वात्समष्टित्वमित्यर्थः तया वृक्षवज्जलवद्वा व्यष्टिरपि भवति । अनेकेषां जीवा
प्रत्येकस्वस्वलिंगशरीरस्य स्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः अत्र दृष्टांतमाह । वृक्षवदित्या
दि । उक्तसमष्ट्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शयति । एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यग
र्भः प्राण इत्युच्यते । तत्र हेतुमाह सर्वत्रानुस्यूतत्वात् ज्ञानक्रियाशक्तिमदुपहितत्वाच्च । सर्वप्राणिलिंगशरीरे
षु अनुस्यूतत्वाद्विद्यमानत्वादित्यर्थः हेत्वंतरमाह ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः
विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरत्वं दर्शयति । अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात्सूक्ष्मश
रीरं विज्ञानमयादिकोशत्रयं । अस्य सूत्रात्मनो हिरण्यगर्भाख्यस्य विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरं अस्य स्थूल
प्रपंचापेक्षया सूक्ष्मत्वादित्यर्थः अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वयुक्तिमाह । जाग्रद्वासनामयत्वात्स्वप्नः १५

विराड्रूपेणानुभूतस्थूलप्रपंचविषयकवासनामयत्वात्स्वप्नत्वमस्येत्यर्थः ॥ अत एवास्य स्थूलप्रपंचलयस्थानमिति चोच्यु
ते ॥ यत्तेजसः स्वप्नत्वं सूक्ष्मत्वं वासनामयत्वं अत एवास्य स्थूलप्रपंचलयस्थानमित्युच्यते इत्यर्थः ॥ विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचै
तन्यस्य हिरण्यगर्भत्वं प्रतिपाद्य इदानीं तद्व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति ॥ एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भ
वति तत्र हेतुमाह ॥ तेजोमयांतःकरणोपहितत्वादस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरप्यस्य सूक्ष्मशरीरं विज्ञा
नमयादिकोशत्रयं ॥ व्यष्टिरूपं विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मशरीरमिति दर्शयति ॥ अस्यापीति सूक्ष्म
शरीरत्वे हेतुमाह ॥ स्थूलेति अस्यापि स्वप्नत्वे हेतुमाह ॥ जाग्रद्वासनामयत्वात्स्वप्नः विश्वस्य चैतन्येनानुभूतस्थूलशरीर
विषयकवासनामयत्वात्स्वप्नत्वमित्यर्थः ॥ अस्यैव सूक्ष्मशरीरस्य स्थूलशरीरलयस्थानत्वे युक्तिमाह ॥ जाग्रद्वासना
मयत्वात्स्थूलशरीरलयस्थानमिति चोच्यते ॥ यथा पूर्वं प्राज्ञेश्वरयोर्ज्ञानवृत्तिभिः सुषुप्त्यवस्थामानंदमनुभवतः त या
था हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान् शब्दादिविषयान् अनुभवतः इति दर्शय
ति एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः अस्मिन्नर्थे श्रुतिमुदाहरति ॥ प्रवि

१६ विविक्तं भुंक्ते जस इत्यादिश्रुतेः ॥ इहापि विज्ञानमयादिकोशत्रयस्य समष्टिरूपस्य तदवच्छिन्नस्य सूक्ष्मसूत्रात्मनश्च व्यष्टिरू
पविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य च वनवृक्षादितदवच्छिन्नाकाशादिदृष्टांतमुखेनाभेदं दर्शयति
अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवज्जलाशयजलवत्तद्गतप्र
तिबिंबाकाशवच्चाभेदः समष्टिव्यष्ट्युपाध्योर्वनवृक्षवज्जलाशयजलवच्चाभेदः उपाधिद्वयावच्छिन्नचैतन्ययोः
सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः ॥ सूक्ष्मशरीरो
त्पत्तिप्रकरणमुपसंहरति ॥ एवं सूक्ष्मशरीरोत्पत्तिः ॥ अथेदानीं स्थूलप्रपंचोत्पत्तिं निरूपयितुमुपक्रमते ॥ स्थूल
भूतानि तु पंचीकृतानि ॥ तुशब्दः पूर्वस्माद्वैलक्षण्यं द्योतयति ॥ पंचीकृतानीति ॥ अपंचीकृतभूतापेक्षया स्थूलभूतानि ता
नि पंचीकृतानीत्यर्थः ॥ पंचीकरणमेव प्रतिपादयितुं प्रतिजानीते ॥ पंचीकरणं तु ॥ पंचीकरणमेवाह ॥ आकाशादिपं
चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्धा विभज्य तेषां चतुर्णां भागानां
स्वस्वद्वितीयार्धभागपरित्यागेन भागांतरेषु संयोजनं ॥ अयमर्थः सृष्टिकाले सकलप्राण्यदृष्टवशादीश्वरप्रेरणया

ऽकाशवायुतेजोऽबन्नान्यविद्यासहायभूतात्परमात्मनः सकाशादनुक्रमजातानि तान्यपंचीकृतानि सूक्ष्माणि
व्यवहारसमर्थानीति कृत्वा तदीयस्थौल्यापेक्षया व्यवहर्तृप्राणिजातधर्माधर्मापेक्षया तान्येव भूतानि पंचीकृता
नि भवंति तानि च प्रत्येकं द्वैविध्यमापद्यंते तेष्वाकाशादिषु दशसु भागेषु प्राथमिकान्पंचभागान्प्रत्येकं चतुर्धा
समं विभज्य स्वार्द्धभागपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु संनिवेशेन पंचीकृतानि स्थूलानि भवंति ॥ अस्मिन्न
र्थे वृद्धसंमतिमाह ॥ द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते इति ॥ पंचीकरणस्य
त्रिवृत्करणप्रतिपादकश्रुत्यंतरविरोधमाशंक्य परिहरति ॥ अस्य प्रामाण्यापनोदनीयं त्रिवृत्करणमिति श्रुतेः
पंचीकरणस्याप्युपलक्षणत्वात् ॥ भूतत्रयसृष्टिश्रुतौ सृष्टिपारिपूर्त्यर्थं अन्यच्च श्रुतमपि भूतद्वयमाश्रित्य भूतपंचकाभिप्राये
ण भूतत्रयसृष्टिप्रतिपादनादविरोध इत्यर्थः ॥ आकाशादिपंचभूतेषु चतुर्द्धा विभक्तानामेषां पंचभूतानां प्रत्येकमनुप्र
शा वेशेन पंचीकृतानामाकाशादीनां पंचात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशंक्य परिहरति ॥ पंचानां पंचात्मकेस
मानेपि तेषु वैशेष्यात्तु तद्वादस्तद्वाद इति न्यायेन आकाशादिव्यपदेशः संभवतीति ॥ आकाशादीनां पंचानां पंचात्मकत्वेस

१७ मानेपि तेषु पंचसु भूतेषु तत्तद्विशेषानुप्रवेशात्तत्तन्नामभिर्व्यवहारसंभवतीत्यर्थः ॥ तदानीमाकाशे शब्दोभिव्यज्यते
यदा पंचीकृतानि आकाशादीनि तादानीं स्थूलत्वेन स्वस्वकार्योत्पादनासमर्थत्वात् आकाशेऽव्यक्तरूपेणास्थितः
शब्दोऽभिव्यज्यते व्यक्तो भवतीत्यर्थः ॥ वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्द
स्पर्शरूपरसगंधाश्च ॥ उक्तेभ्यो भूतेभ्यश्चतुर्दशभुवनोत्पत्तिप्रकारं दर्शयति ॥ एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवस्वर्मह
र्जनस्तपःसत्यमित्येतन्नामकादीनां उपर्युपरि विद्यमानानां अतलवितलसुतलरसातलतलातलमहातलपातालमितिना
कादीनामधोधो विद्यमानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरीराणां तदुचितान्नपानादीनां चोत्पत्तिर्भवति ४ एते
भ्यो भूतेभ्यः समुत्पन्नब्रह्मांडस्य चतुर्विधस्थूलशरीराणां च तद्योग्यान्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः चतुर्विधशरीरा
ण्युद्दिशति ॥ चतुर्विधशरीराणि तु जरायुजांडजोद्भिज्जस्वेदजाख्यानि ॥ तानि यथोद्देशं विवृणोति ॥ जरायुजानि तु जरा
युभ्यो जातानि मनुष्यपश्वादीनि अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि स्वेदजानि स्वेदेभ्यो जातानि यूकालिक्षाम

१८

शकादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्ष वृक्षादीनि । पूर्ववदत्रापि समष्टिभेदं दर्शयति । अत्रापि चतुर्विध
सकलस्थूलशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भवति । चतुर्विधशरीरजा
तमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तत्तच्छरीरविषयतया अनेकबुद्धिविषयत्वाद्वृक्षवद्व्यष्टित्वं
च लभत इत्यर्थः । अथ नाम्नः रादि चतुर्दशभुवनान्तर्गतं चतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यं वैश्वानर इत्या । ऽपरपर्याय विराज
ञ्च दर्शयति । या समष्ट्युपहितचैतन्यं वैश्वानरो विराडिति चोच्यते । अत्र युक्तिमाह । सर्वनराभिमानित्वाद्विविधं विराजमान
त्वाच्च । सर्वप्राणिनिकायेष्वहमित्यभिमानत्वाद्वैश्वानरत्वं विविधं नानाप्रकारं राजमानत्वाद्वैराजत्वं च लभत इत्यर्थः । अस्यैषा
समष्टिस्थूलशरीरं अस्य वैराजस्य चैतन्यस्य एवं पूर्वोक्तप्रकारब्रह्माण्डान्तर्गतचतुर्विधस्थूलशरीरमित्यर्थः । अन्नविकारत्वाद
न्नमयः कोशः स्थूलभोगायतनत्वात् स्थूलशरीरं जाग्रदिति च व्यपदिश्यते । अन्नविकारमयं बाहुल्यादन्नमयत्वं आत्माच्छा
दकत्वात् कोशत्वं स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरीरं इन्द्रियैरर्थोपलब्धिरूपजाग्रदवस्थात्वं
च घटत इत्यर्थः । चतुर्विधस्थूलशरीरसमष्ट्युपहितं चैतन्यं सप्रपञ्चमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते । एतद्व्य

१८ ष्ठ्युपहितचैतन्यं विश्व इत्युच्यते एतेषां चतुर्विधशरीराणां व्यष्टिजातं शरीरव्यक्तिस्तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः
तत्र हेतुमाह । सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात् । सूक्ष्मलिंगशरीराभिमानमपरित्यज्य स्थूलशरीरे
षु प्रविष्टत्वात् तत्स्थूलशरीरेषु सर्वप्रत्येकमहमित्यभिमानवत्त्वाद्विश्वत्वमित्यर्थः । अस्याप्येषा व्यष्टिः स्थूलशरीरं अस्य
पि विश्वचैतन्यस्याप्येषा तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिरेव स्थूलमित्यर्थः अत्राप्यन्नविकारबाहुल्यादानंदमयत्व
चैतन्याच्छादकत्वात्कोशत्वं इंद्रियैरर्थोपलंभात् जाग्रत्वं चेत्यत्र मे तादृशीयति । अन्नस्य विकारादेव हेतोरन्नमयः कोशः जाग्र
द्रूपीति चोच्यते । अस्यैतज्जाग्रदवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिश्चतुर्दशभिः करणैः शब्दादि
विषयग्रहणप्रकारं दर्शयति । तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंतृत्वेन श्रोत्रादींद्रिय
पंचकेन क्रमाच्छब्दस्पर्शरूपरसगंधान् अग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंतृत्वेन वागादींद्रियपंचकेन क्रमा
द्वचनादानगमनविसर्गानंदान् चंद्रचतुर्मुखशंकराच्युतैः क्रमान्नियंतृत्वेन मनोबुद्ध्यहंकारचित्ताख्येनां

नांतरिंद्रियं चतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचित्ताख्यैः सर्वानेतान्स्थूलविषयाननुभवतः । अस्मिन्न
र्थे श्रुतिसंवादमपीति । जागरितस्थानो बहिःप्रज्ञ इत्यादि श्रुतेः । अनयोर्विश्ववैश्वानरयोर्वनवृक्षावच्छिन्नाकाशव
च्छिन्नजलाशयजलगतप्रतिबिंबाकाशेनवपूर्ववदभेदं दर्शयति । अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्यो
स्तदुपहितयोर्विश्ववैश्वानरयोश्च वनवृक्षावच्छिन्नाकाशवच्च जलाशयजलगतप्रतिबिंबाकाशवच्चवा
पूर्ववदभेदः । स्थूलशरीरप्रपंचोत्पत्तिमुपसंहरति । एवं पंचीकृतभूतेभ्यः स्थूलशरीरप्रपंचोत्पत्तिः । स्थूल
सूक्ष्मकारणप्रपंचानां समष्टिरूपतानां प्रत्येकविवक्षयावांतरप्रपंचत्वमभिधायेदानीं तेषां समष्टिमेकं म
हाप्रपंचं दर्शयति । एतेषां स्थूलसूक्ष्मकारणप्रपंचानामपि समष्टिरेको महान्प्रपंचो भवति । तत्र दृ
ष्टांतमाह । यथावांतरवनानां समष्टिरेकं महद्वनं यथा अवांतरजलाशयानां समष्टिरेको महान्ज
लाशयः । यथा धवखदिरपलाशाद्यवांतरवनानां समष्टिः समुदायविवक्षया एकं महद्वनं भवति य
था वापीकूपतडागादीनामप्यवांतरजलाशयानां समुदायविवक्षया

२२ लोकच्चैविश्व३

एको महान् जलाशयो भवति तथास्मत्स्थूलसूक्ष्मकारणावान्तरप्रपंचानां समुदाय एको महान् प्रपंचो भवतीति
त्यर्थः एतदेवावान्तरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भाव्याकृतानां चावान्तराव
च्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिंबाकाशवच्चाभेदइत्याह ॥ एतदुपहितं वैश्वानरादीश्वर पर्यं
तं चैतन्यमपि अवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिंबवच्चैकमेव ॥ चैतन्यप्रपंचयोर्भेदे स
र्वं खल्विदं ब्रह्मेति श्रुत्याविरोधमाशंक्य परिहरति ॥ आभ्यां महाप्रपंचतदुपहितचैतन्याभ्यां तप्तायःपिंड
वदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति ॥ अन्योन्यतादात्म्याध्यासात्तो[illegible]सत्स्वरूपं विविक्त
पि भवतीत्यर्थः ॥ अध्याहारोपप्रकरणमुपसंहरति एवं वस्तुन्यवस्त्वारोपो समान्येन प्रदर्शितः ॥ ईश्वरचैतन्यसामान्यतो महा
प्रपंचाध्यारोपप्रकरणं सप्रपंचमभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते इदानीमित्या
दिना अध्यारोपमेवाह ॥ इदानीं प्रत्यगात्मनि इदमिदमयमयमारोपयतीति विशेषत उच्यते ॥ अतिप्राकृतस्तु ॥

१० प्रत्यगादिसंनिहितस्यापत्यादिधर्म्मिणः इदमिदमा निर्देशः क्रियते इदमित्यादिवीप्सा तथा च अतिप्रास्य
बुद्धिस्तु इदम्प्रत्यादिकमेणाह   अपंपुत्र एवाहमित्यंतं बाह्यधर्मान्विशेषेणात्मन्यध्यारोपयतीत्य
र्थः अत्र श्रुतिमाह । आत्मा वै जायते पुत्र इत्यादिश्रुतेः । तत्र युक्तिमाह । स्वस्मिन्निव स्वपुत्रेपि प्रे
मदर्शनात्पुत्रे पुष्टे नष्टे च अहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति । यथा स्वशरीरे प्रेम
दर्शनादात्मत्वभ्रमः एवं स्वपुत्रादिशरीरेपि प्रेमदर्शनादात्मत्वभ्रम इत्यर्थः अत्रानुरूपमनुभ
वमाचष्टे । पुत्र इति । पुत्र इति । एतदपेक्षयापि विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्यत इत्याह चार्वाकस्तु
त्रापि श्रुतिमाह । स वा एष पुरुषोऽन्नरसमय इत्याद्श्रुतेः ।

त

पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन्नप्रयोजकत्वाधिकारिणः सकाशात्स्वस्यैव लक्ष्य
सांप्रदर्शयति॥ प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनाद्देहस्यात्मत्वेऽनुभवं च माश्र
यति। स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदन्ति॥ ततोऽप्युक्तदृष्टेः कोऽप्यधिकारी अ
तिपुष्टपन्ने भवेत्य इन्द्रियाणामात्मत्वे निवदन्नेत्याह॥ अपरश्चार्वाकस्तेह प्राणाः प्रजापतिमेत्यत्र युवि त्यादि
श्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति व
दन्ति। ततोऽप्युत्तमाधिकारी कश्चित श्रुतिप्रमाणाद्युक्त्यनुभवलोभात्प्राणस्यात्मत्वमित्याह। अपरश्चा
र्वाकोऽन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इन्द्रियादिचलनायोगात् अहमशनायावा
नहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदन्ति। ततोऽपि विशिष्टाधिकारी कश्चित्स्वमतानुकूलश्रु
त्यादिकालसालोभेन मनस आत्मत्वमाह। अन्यस्तु चार्वाकोऽन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः मनसि द

स्तुतेप्रारतादे यथा वाक्त अहसंकल्पवानहं विकल्पवानित्याद्यनुभवाद्व मनआत्मेति वदंति ५ डेकेभ्यः पंचभ्यो विलक्षु
णात्कुक्षिस्थिहिस्रानवादी श्रुत्यादिभिरान्नमात्मेत्याह ५ वेदव्यस्त न्योंतरआत्मा विज्ञानमय इत्यादिश्रुतिः करणं
नभावे कर्तारस्य शक्त्यभावात् अहं कर्ताहं भोक्तेत्याद्यनुभवाद्बुद्धिरात्मे [illegible] प्राभाकरा इति वदंति ॥ ६ ॥ क्वचि
न्मो क्षमिति जैनोपदेशाका अर्कि को स्वयुक्तोपयोगि श्रुत्यादि वक्ताद्दस्त्रा नमात्मेति वदन्ते इत्याह ५ आत्मापि स्वतः किं का
वन्योंतरआत्मा आनंदमय इत्यादि श्रुते सुषुप्तादी नामस्त्राने लद दृग्नाते अहमसौ अहमसौ नीत्य नुभवाद्ध अज्ञ
नमात्मेति वदन्तः ५ भट्टास्तु अज्ञानावच्छिन्नं चैतन्यमात्मेत्याह ५ प्रज्ञानघन एवानन्दमयं इत्यादिश्रुतेः सुषुप्तौ प्र
काशाप्रकाशाभ्यां सद्भावान्नमासाहं नजानामीत्यनुभवाच्च आत्मेत्याद्यनुभवाच्च अज्ञानोपहितचैतन्यमात्मेति वदंति गौणकदेशी ॥ २१ ॥
कश्चित्तु इत्यादिवक्ता स्वशून्यमात्मेत्याह ५ असदेवेदमग्र आसीदित्यादि श्रुतेः सुषुप्तौ सर्वाभावात्
सुषुप्तिर्नास्त्युत्थितस्य अस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदन्ति अच्युतानां पुत्रादि शून्ये
पर्यन्तानामात्मत्वसाधिपादकश्रुत्यादेस्त्वाभानात्मत्वानं पूर्वपूर्वमतस्योत्तरोत्तरमतेनोच्यमाना इति हंतेक
देवकेभ्यात्मत्वे पक्षि हि भवे तिसाधितपादपि तं पतिगोमानी ५ पप्तांउक्तादी नोपनात्मत्वमुच्यते ॥ पुत्रादात्म

त्ववादिनामेति संज्ञाधिकारित्वात्त्यति पादिमश्रुत्पादेन पि पूर्व पूर्वस्यो त्तरो त्तर वाध्यत्वात्सुत्रा
दि शून्यांतानामनात्मत्वं सिद्धमेवेति प्रति सातमेव कुर्षं प्रकटय ति॥ एतेन ति गरुत्वादि देवादसि
तूनो सु श्रु ति प्रयु नाप नु मा वामासे पु पूर्वो न्नत्र श्रुति पु नाप नु मथ। मासिनामुतन श्रुति पु नाप नु मा
वामासौ वात्मत्व वा यदर्शना त्या। पुत्रवादीनामनात्मत्वं [illegible] स्पष्टमेव। ननु पुत्रादि शून्य पर्यंता
नाम नात्मत्वे सिद्धे कस्तर्हि हं प्रत्ययविष्या त्मत्वा सं बधा ऽस्तु लादि निबंधवाक्य तात बोधितं
तत्वं सा न न मतं प्रेद्धे त्यादि श्रुति धिवाक्य कोटि बोधितं पतत्वं सानो नं नाद्ध पं प्रयुक्तदे वाहमालेव नत्रिति
गव श्रु ति पु नाप नु मवे: प्रतिपादयितुमाह। देवं ॰ प्रगस्तु लोऽव पुत्र करणोऽनमस्तो: कनाथेन त्वंदि ना
त्वं सादि त्यादि प्रवल श्रुति वाक्यै: पुत्रादिशून्यंतानामनित्यत्वा ऽस्वरूप प्रतिपादनान्पुत्रादीनां ऽहं त्वादि है
तुस्थिरनात्मत्व मित्यर्थ: अस्मिन्नर्थे प्रबलं हेतु नु भवं प्रमाणयति॰ ... प्रतेति विद्वद नुभवं प्रमाणा

॥२४॥

स्योऽपि पुत्रादिष्वन्यादीनां दोषवत्त्वे दृश्यमानानुकृति पुत्तपव भनाभासानां बाधितत्वाद यि पुत्रादिष्वन्य
प्रत्येतव्यविलक्षणनीत्यैव ...सर्वं तु नित्यं शुद्धं मुक्तस्वभावं परमं ज्योतिः स्वरूपं वा न्म वस्त्विति
वेदान्तविद्वद्भवः प्रयतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वं ज्ञात्वा पुत्रादिभावसर्वकं नित्यशुद्धस्वात्मा
दिस्वरूपमेवात्मवस्त्वित्यर्थः ननु इदं विरुद्धं यत् पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यं वस्तु
स्यादि श्रुतीनां प्रामाण्यमिति न हि त्वे वेदवाक्ये पुत्रकेषां चित्प्रामाण्यं केषां चिदप्रामाण्यं वा शक्यं
प्रतिपादयितुं एवं च पुत्रादि श्रुतीनां प्रामाण्यमस्तु तथा हि वाक्यानामप्रामाण्यमिति वैपरीत्यं किं
त्वस्यात्मवेद वाक्यत्वाऽविशेषाविति केवलं विरुद्धवाक्यानामप्रामाण्यप्रतिपादनं प्रसिद्धं प्रके
वलानामर्थप्रश्न के पं निर्णयः इतिचेन्न यतो ध्येन पुत्रादि श्रुतीनां सर्वथैव प्रामाण्यं नास्तीति न
मिति ध्वनितं किं तु ... लोकसिद्ध लक्ष्य श्रुतिस्मृति न्यायविरोधात् स्वार्थे तात्पर्याभावात् किं त्वास्तु
लोऽबधितान्यायेन पूर्व लिङ्गाकार द्वारा स्तुतिपरत्वं वस्तुपदेशे तात्पर्यमित्येतावदेव प्रतिपाद्यते तत्रापि के

२४

१ ध्रुव महर्षीणां वदर्शयेदिति निविर्विवर्तीद्धव धोनहं धनीद्दं नेगाम्ने परमस्तु ऽस्यानुपाद्याः अहंनूं धनस्याःप्रव्य
मके चिन्नुत्पाद्यानेव प्रतिपन्नुमशक्य त्वा त्वप्रत्यमंयंदूल्योतिनुपा ऽन्नं धनीन्तुव्यते न न स्वंदेमित्रोमान कात्र
त्वयाल्मिके न्तुव्यन्ते न न स्तन्न धमानके न्तुव्यन्ते न न स्त स्तमीपर्वि निर्नीपरे मस्तु ऽस्मनुपा अहं धनी न्तुव्यते । नैवेता
एतेषांपंचानांवाक्यानांपरस्य विरूद्धा र्थजनिपादके ना ऽप्रामाराण्यं थवंच प्रतिपादयितुं किंतुत्रतिपन्न वेध्यन्तुत्र
वेता सोपान क्रमपूर्वं न्तूर्ध्वं निनिवाकरणाद्बाधास्तु ऽमा अहं नूं धनीप्रतिपाद नेत्रा न्यपरति । नद्दहि हापि अरिमन्प
क्षे अधिकारी प्रतिक्रमेशो पदेशाऽक्रियते अत्रमय: इति नद्द हिहापि अन्नमय: प्राणा: मयोमनो विज्ञानमयः
आनंदमय आत्मा ब्रह्म पुच्छं प्रतिष्ठेति पुच्छब्रह्मपर्यवसिताना पंचकोशवाक्यानामपि परस्परविरूद्धार्थ
प्रतिपादकत्वेऽपि नु पन्नुक्ष्यनुसारेणासोपानक्रमेण न्तूर्ध्वं निवाकरणाद्बाधापरमस्तु ऽस्मपुरूष प्रतिपादकत्वेनान्यपरत्व
नस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया धाऽद्वितीय वस्तु प्रतिपादकत्वेनान्यपरत्वाप्रामाण्याविरोधइति संक्षेप:
विशेषाऽध्यारोपापवादकरणतामपसंहरति । एवमध्यारोपः । आत्मा वस्तु निर्विकल्पकं वस्तुसामान्यतो विशेषतश्चा

ध्यारोपप्रकारंप्रदर्श्यवममिधायेदानीं तदपवादप्रकारं वक्तुमारभते ॥ अथापवादो नामेति निष्ठसंडोदासीने
प्रत्यभासवस्तुनि तत्त्वविवर्तवस्तुभूताऽज्ञानादिनिष्प्रपंचस्य विवर्तस्तुमात्रावशेषकेवलयाऽवस्थयातन्मेवाप
वादइतिवक्तुंशयंसंलौकिकदृष्टांतमाह रज्जुविवर्तस्यसर्पस्यरज्जुमात्रत्ववत्वस्तुनोऽज्ञानादेःप्रपंचव
स्यवस्तुमात्रत्वं रज्जुस्वरूपापरित्यागेनसर्पाकारेणावभासमानस्यरज्जुविवर्तस्यापवादोनाशोनामाधिष्ठान
रज्जुमात्रतयाऽवस्थानवद्विवर्तस्याज्ञानादिप्रपंचस्यनाशोनामविनाशात्स्वेनावस्थानमित्यर्थः अत्रयद्वा
स्वरूपेणास्थितस्यवस्तुनोऽन्यथाभावोद्विधाभवति। परिणामभावोविवर्तभावश्चेति तत्रपरिणामभावो
नामवस्तुनःपूर्वापरीतःस्वरूपंपरित्यज्यस्वरूपान्तरेणाभिव्याप्तिप्रतिपत्तिः यथादुग्धस्यदधिस्वरूपापत्तिः तथैव
भाकेनेरापरिणामजे विवर्तभावोनामपूर्ववस्तुवस्तुनःस्वस्वरूपापरित्यागेनस्वरूपान्तरेणाभिव्याप्तिप्रतिपत्तिःयथ
थारज्जुस्वरूपाऽपरित्यागेनसर्पाकारेणाभिव्याप्तिभासस्तेऽत्रवेदान्तेऽभिमतोऽयं वर्तमानस्यपरिणामभावो
दीनांक्षीरवत्तेषुधाद्विवदूलसोविकारित्वप्रसंगाच्छ्वानित्यत्वादिदोषापत्तेः विवर्तभावाकारेतुवापंदोयथा

साम

सिः प्रदंवभाःनरूपमिथ्यात्वेविकारित्वाभावात्तु नह्येतौ॰ अधिष्ठानावशेषो हि बाधः कस्मिंश्चिद्वस्तु
नऽप्रतिनस्यात्रिहिवर्त्तस्यापिस्यात्अवशेषेवनयाऽवस्त्यानमेवायुवादइतिभावः अस्मिंश्च चैतं पांतवसंवा
देर्भ्रांतिसतत्त्वतोऽन्यथाप्रथाविकारइत्युदीरितः अतत्त्वतोऽन्यथाप्रथाविवर्त्तइत्युदीरितः सामान्यले
हितानामपवादः क्रियांविस्तरेणाप्रतिपाद्यितुं प्रकृतिसानोत्तेनप्यास्मृन्देस्त्ऽनकारणाप्रपंचानात्सृष्ट्य
सिंवपूर्वोत्पन्नेनततत्कारणात्मरूपेणावस्थानमेवापवादइत्याह ९ एतन्नोगापतनं वतुर्विंशतमकेलेखेलशक्ती
नज्ञातेभोभयरूपात्रयात्मादिकं एतदाश्रयभूतादिवतुर्दशभुवनानि एतदाश्रयभूतब्रह्मांडं वपुःसर्वनेते
षां कारणरूपंपंचीकृतमात्रमेवतिएतानिशब्दादिविषयसहितानिपंचीकृतानिसूक्ष्मशरीराणिसंस्कृते
त्सर्वमेतेषांकारणरूपाऽपंचीकृतभूतमात्रमेवतिएतानिशब्दादिगुणसहितानिअपंचीकृतानीत्युच्यन्ते
भेणात्रतत्कारणसाभूतानांसानोपहितेनेवतन्रूपंतत्सर्वपंचीकृतमात्रंभवतिएतत्तत्रप्रलयेऽपंचीकृतसूक्ष्म
तेस्यकारणाभूतमपंचीकृतेषुमहाभूतेषुलीनंसत्तन्मात्राऽवतिष्ठते तानिपंचीकृतानिभूतानिशब्दादिसह

राम

स्योत्सर्गो
दृ॰ तानि ॥ वायुवाम्नकादिस्थलीयाधिकारित्वस्य प्रकारतावच्छेदकं वीक्ष्य तन्निष्ठत्वेन बुद्धौ नानि भवन्ति तान्यपि वी-
कृतानि सत्त्वादिगुणासहितानि स्वकारणात्मनोपहितत्वेन तन्येलीना भवन्ति तच्छ्वासावातेद्धुपहितत्वेन तन्यं सर्वत्र
त्वादिविशिष्टं स्वाधारमूर्तानुपहितत्वेन तन्ये लीनं भवन्ति वैतन्ये मेवावशिष्यते इत्यन्वयः । फलितमाह । आभ्यां
मध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवन्तित्यत्त्वंपदयोः शोधनप्रकारं प्रदर्शयितुं प्रतिसा
१४॥ चिन्ते तत्पाहि । अस्तानादिसमष्ट्यैतदुपहितं सर्वेऽत्यादिविशिष्टं चैतन्यं तदनुपहितं चैतन्यं केवल एतत्त्वं प ॥१४॥
तदनुपहितं चैतन्यं तत्वं तप्तायः पिण्डवदैकत्वेनावभासमानं तत्पदस्य वाच्यं भवन्ति अस्तानं तदेवाक्षि
अश्वरचैतन्यं तदनुपहितचैतन्यं चैतन्यं तत्त्वं नेमा । यः पिण्डवदिन्योन्याध्यासेनैकत्वेन प्रतीयमानं सन्त
त्पदवाच्यं भवतीत्यन्वयः । तत्पदलक्ष्यार्थमाह एतदुपाध्युपहिताधारमनुपहितं चैतन्यं तत्पदलक्ष्यं यान्त्यपद
लक्ष्यार्थो भवतीत्यन्वयः । त्वंपदवाच्यमाह । अस्तानादिव्यष्टिनेतदुपहितो सत्त्वादिविशिष्टं चैतन्यं एतदनुपहितं
